# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1)  **प्रश्नपत्रम् – ६**  गुणाः - ७०

विषयः – रामानुजवेदान्तः  **कोड – CC-1.1.2**  समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – १०/१२/२०१६  सन्दर्भग्रन्थः – ईशकेनमुण्डकोपनिषदः (रङ्गरामानुजभाष्यसहिताः)

---

**प्रथमान्वितिः (Unit-1)**

प्रश्नः – १ **निम्नलिखितेषु मन्त्रेषु कस्योश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो ह वाचं स उ प्राणस्य प्राणः।
चक्षुषश्चक्षुरतिमुच्यधीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति॥

(२) यस्यामतं तस्य मतं मतं यस्य न वेद सः।
अविज्ञातं विजानतां विज्ञातमविजानताम्॥

(३) इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचिन्त्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति।

प्रश्नः – २ **निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) उपनिषदां परिचयपुरस्सरं केनोपनिषदः शान्तिमन्त्रं विलिख्य तस्य व्याख्यां लिखत

(२) केनोपनिषदः चतुर्थखण्डस्य सारांशं लिखत

प्रश्नः – ३ **निम्नलिखितयोः कस्यचिद् एकस्य उपरि लघुटिप्पणीं लिख्यताम्** ०२

(१) उमा हैमवती।  (२) उपनिषच्छब्दार्थः।

प्रश्नः – ४ **अधोनिर्दिष्टेषु कयोश्चिद् द्वयोः अतिलघूत्तरं यच्छत**। ०२

(१) केनोपनिषदि कति खण्डाः सन्ति ?  (३) मघवन् इति पदस्य कः अर्थः?

(२) जीवाः केन प्रेरितामिमां वाचं वदन्ति?  (४) पञ्चप्राणाः के ?

**द्वितीयान्वितिः (Unit-2)**

प्रश्नः – ५ **निम्नलिखितेषु मन्त्रेषु कस्योश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥

(२) असुर्या नाम ले लोका अन्धेन तमसाऽऽवृताः।
ताँस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥

(३) हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।

प्रश्नः – ६ **निम्नलिखितयोः कस्यचिद् एकस्य समीक्षात्मकम् उत्तरंलिखत।** ०८

(१) ईशोनिषद्भाष्यानुसारेण परमेश्वरस्य स्वरूपं संसाधयत

(२) ब्रह्मविद्यायाः अङ्गभूतस्य कर्मयोगस्य स्वरूपं यथाभाष्यं प्रतिपादयत।

प्रश्नः – ७ **निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) तेन त्यक्तेन भुञ्जीथाः।  (३) "परिभूः" शब्दस्य अर्थः।

(२) पूर्णमेवावशिष्यते।  (४) कविः इति शब्दस्य अर्थः।

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) ईशोपनिषदि कति मन्त्राः सन्ति ?

(२) "दर्शनम्" इति पदस्य कः अर्थः ?

(३) मनीषी इति पदस्य कः अर्थः ?

(४) के अन्धं तमं प्रविशन्ति?

(५) कया अमृतम् अश्नुते?

(६) सत्यस्य मुखं केन पात्रेण अपिहितम्?

(७) आस्तिकदर्शनानि कति सन्ति ?

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ९ निम्नलिखितेषु मन्त्रेषु कस्योश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्यां लिखत।** ०८

(१) तत्राऽपरा ऋग्वेदो यजुर्वेदः सामवेदोऽर्थर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।
अथ परा यया तदक्षरमधिगम्यते ॥

(२) यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः।
तस्मादेतद् ब्रह्म नाम रूपमन्नं च जायते ॥

(३) भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥

**प्रश्नः – १० निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत।** ०८

(१) मुण्डकोपनिषदाधारेण पराऽपराविद्यायाः यथाभाष्यं स्वरूपं प्रतिपादयत।

(२) मुण्डकोपनिषदमनुसृत्य सृष्टिक्रमं विशदयत

**प्रश्नः – ११ निम्नलिखितेषु द्वयोः उपरि लघुटिप्पणीं लिख्यताम्।** ०४

(१) भूतयोनिः।

(२) इष्टापूर्तं कर्म।

(३) अक्षरः इति पदस्य अर्थः।

(४) अन्तर्यामीति पदस्य अर्थः।

**प्रश्नः – १२ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) मुण्डकोपनिषत् कस्य केन वेदेन सम्बद्धा?

(२) "द्वा सुपर्णा सयुजा' इति मन्त्रं लिखत।

(३) कर्मबीजं केन ज्ञानेन दग्धं भवति?

(४) मुण्डकोपनिषदि मुण्डकानां सङ्ख्या कति?

(५) मुण्डकोपनिषदः प्रथमः मन्त्रः कः ?

(६) अङ्गिः कस्मै ब्रह्मविद्यां प्राह ?

(७) "भुवनस्य गोप्ता" इत्यस्य कः अर्थः?

***

## Answer Key

कक्षा – शास्त्रिप्रथमवर्षम् (SEM-1) **प्रश्नपत्रम् – ६** गुणाः - ७०

विषयः – रामानुजवेदान्तः **कोड – CC-1.1.2** समयः – ०३ तः ०६ पर्यन्तम्

दिनाङ्कः – १०/१२/२०१६ सन्दर्भग्रन्थः – ईशकेनमुण्डकोपनिषदः (रङ्गरामानुजभाष्यसहिताः)

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – ३**
१. चत्वारः
२. नारायणेन
३. इन्द्रः
४. प्राण-अपानादि .....

**प्रश्नः – ४**
१.

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ८**
१. अष्टादश
२. दृश्यते साक्षात्क्रियते अनेन इति दर्शनम्
३. ज्ञानी।
४. ये अविद्याम्/असम्भूतिम् उपासते
५. विद्यया
६. हिरण्मयेन पात्रेण
७. षट्

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः – ११**
१. सर्वभूतानां योनिः कारणम् इत्यर्थः
२. श्रौतयजनादि इष्टम् , वापीकूपादिनिर्माणं पूर्तम्

**प्रश्नः – १२**
१. अथर्ववेदेन।
२. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥
३. ब्रह्मज्ञानेन।
४. त्रयः।
५. ब्रह्मा देवानां प्रथमः सम्बभूव। विश्वस्य कर्ता भुवनस्य गोप्ता। स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामर्थर्वाय ज्येष्ठपुत्राय प्राह।
६. भारद्वाजाय
७. भुवनस्य पालयिता इत्यर्थः